श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला–२१

# वाक्यार्थज्योतिः
# Vākyārthajyotiḥ

अङ्कः - 3 वर्षम् :– २०१७ – १८

प्रधानसम्पादकः

**प्रो. गोपबन्धुमिश्रः**

कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादकौ

**डॉ. डी. एम्. मोकरिया,** सहायकाचार्यः

**डॉ. बी. उमामहेश्वरी,** सहायिकाचार्या

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी–वेरावलम्**

Scanned with CamScanner

प्रकाशकः -

डॉ. दशरथजादवः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६

गीर-सोमनाथजनपदम्, गुजरातम्

दूरभाष : ०२८७६-२४४५३२, फेक्सः २४४४१७

www.sssu.ac.in

सहसम्पादकः समन्वयकश्च -

डॉ. कार्तिकपण्डया

संशोधनाधिकारी

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, Veraval - 2020*

Note : The statements and views expressed by the authors of articles in this conference proceeding are their own and not necessarily of the editors. The responsibility of the facts stated opinions expressed, or conclusions reached, is entirely that of the author of respective research articles and that Shree Somnath Sanskrit University accepts no responsibility for them.

| | | |
|---|---|---|
| **संस्करणम्** | | प्रथमम् |
| **वर्षम्** | | मार्च २०२० |
| **प्रतिकृतय** | | ३५० |
| **ISBN** | - | 978-93-83097-42-5 |
| **मूल्यम्** | - | रु. १८०/- |

**मुद्रकः** - **जलाराम ग्राफिक्स एन्ड ओफसेट**

परमहंस एपार्टमेन्ट के पास,

होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६

जि. गीर सोमनाथ, गुजरात (भारत)

दूरभाष : (०२८७६) २२१८६१

Scanned with CamScanner

# श्रीमद्भगवद्गीतानुसारेण शान्तिप्राप्त्युपायाः

डॉ. पङ्कजकुमार रावलः,
पुराणसङ्कायाध्यक्षः,
श्रीसोमनाथसंस्कृतविश्वविद्यालयः,
वेरावलम्।

शास्त्रस्य शास्त्राणां नैकानि प्रयोजनानि स्युः। तेषु प्रयोजनमेकं तदप्यस्ति यत् मानवः शान्तिपूर्णं जीवनं जीवेत्। मानवेनापि विविधेभ्यः कारणेभ्यः शास्त्राश्रयः क्रियते तत्र कारणमेकं तदप्यस्ति यत् केनोपायेन अहं शान्तिं लप्स्ये? शान्तिप्राप्त्यै शास्त्रैः शास्त्रेषु के समुपायाः दत्ताः स्युः? इति प्रश्ने जाते सति सः मनुजः शास्त्राश्रयं करोति। शास्त्रशरणं प्राप्नोति।

इदानीं द्वितीयः प्रश्नः भवति यत् शास्त्रं किं? मनुजं मानवं वा शास्ति यत् तत् शास्त्रम्? द्वितीयं-

मतयो यत्र गच्छन्ति तत्र गच्छन्ति वा नराः।
शास्त्राणि यत्र गच्छन्ति तत्र गच्छन्ति ते नराः॥

यत्र मतयः गच्छन्ति तत्र यः गच्छति स तु वा अथवा नरः स्याद्वा न किन्तु शास्त्राणि यत्र गच्छन्ति शास्त्राणि यत्र मानवं नयन्ति तत्र शास्त्रानुसारं वेदानुसारं तदनुसरति तथाचर-ति तथा करोति तत्र तत्र च पृष्ठे गच्छति सः नरः। शास्त्रानुसारं जीवति, करोति वा सः नरः।

अतः प्रश्नः भवति शास्त्रं नाम कः ग्रन्थः? शास्त्रे कस्य समावेशः भवति? शास्त्राणि बहूनि स्युः सन्ति वा तर्हि कस्य शास्त्रस्याश्रयः करणीयः भवति? तस्योत्तरे भगवद्गीतायां माहात्म्ये एकः श्लोकः आगच्छति यत्-

Scanned with CamScanner

एकं शास्त्रं देवकीपुत्रगीतमेको देवो देवकीपुत्र एव।
एको मन्त्रस्तस्य नामानि यानि कर्माप्येकं तस्य देवस्य सेवा॥[1]

शास्त्रं नाम देवकीपुत्रेण यद् गीतं तदेकं शास्त्रम्। देवकीपुत्रेण गीतं शास्त्रमर्थात् भगवद्गीता। अत्र भगवान् गायति यं ग्रन्थं स गीता। गीयते अनेन इति गीता। अनेन नाम श्रीकृष्णेन देवकीपुत्रेण वा।

अत एव भगवता गीतेन शास्त्रेण तद् दृष्टव्यमस्ति। यत् तत्र शान्तिप्राप्त्युपायाः सन्ति। अर्थात् गीतायां मानवेन शान्तिप्राप्त्यै उपायाः समुपलभ्यन्ते? तर्हि भगवान् श्रीकृष्णः प्रत्युत्तरति यत् शान्तिप्राप्त्यै अत्र मया उपायाः निर्दिष्टास्सन्ति। पठैकवारम्।

अत्र श्रीमद्भगवद्गीतायामष्टादशाध्यायाः सन्ति। सप्तशत श्लोकाः सन्ति। तत्र शान्तिप्राप्त्यै के उपायाः? तद्विषये विषयप्रवेशो भवतीदानीम्। गीतातः प्रमाणं प्रमाणभूतं मन्यन्ते विद्वद्भिः।

श्रीमद्भगवद्गीतायां पञ्चदशवारं शान्तिशब्दः प्रयुक्तः वर्तते। शान्तिः शब्दः शान्तशब्दः प्रशान्तशब्दः यत्र यत्र गीतायां प्रयुक्तश्च तेषां समेषां शब्दानां निदर्शनमत्र भविष्यति। गीतायां शान्तिः किमर्थम्? गीतायाः शान्तिः कथं गृहीता? तर्हि तत्र गीतायां प्रथमाध्यायस्यार्जुनः विषादग्रस्तः अशान्तश्च वर्तते तथा अष्टादशतमाध्यायस्यार्जुनः प्रशान्तश्च वर्तते। तर्हि तादृशं तत्र किमस्ति येन उद्विग्नचेतसः स्थितिः एतावती परिवर्तिता भवति येन स एव अर्जुनः प्रशान्ततां प्राप्नोति। प्रथमाध्यायस्य नाम वर्तते अर्जुनविषादयोगः। तादृशः अर्जुनः यः शान्तिमिच्छति किन्तु स शान्तः शान्तियुतो वा नास्ति। विषादग्रस्तस्यार्जुनस्य या मनोदशा वर्तते तदनुसारं तद्विलोक्यैव ज्ञानं भवति यदत्र शान्त्याः आवश्यकता वर्तते।

[1] गीता माहात्म्ये-७।

Scanned with CamScanner

अस्माकमपि कदाचित् स्थितिः तादृशी भवति यत्र वयं विषादग्रस्ताः खिन्नाः भवामः। तस्यामवस्थायां अर्जुनेन किं कृतं तद् ज्ञास्यामः चेद् अस्माभिः किं कर्तव्यमिति ज्ञानं भविष्यति। कथनस्य आशयः प्रथमेऽध्याये अर्जुनोऽस्ति किन्तु सविषादोऽस्ति। तत्र अध्यायेऽस्मिन् शान्तिरिति शब्दः नागच्छति।

द्वितीयाध्यायस्य नाम वर्तते साङ्ख्ययोगः। सङ्ख्यया युतं साङ्ख्यम्। साङ्ख्यं नाम ज्ञानमिति द्वितीयोऽर्थः। यत्र ज्ञानं, मूलं ज्ञानं यथार्थं ज्ञानं भवति तत्र शान्त्याः आविर्भावः भवति। ज्ञानं शान्तिं प्रदातुं समर्थम्। अतः द्वितीयेऽध्याये शान्तिशब्दः आगच्छति किन्तु शान्तिप्राप्त्युपायेषु प्रथमोध्यायः आद्योपायः ज्ञानमिति मनसि ध्यातव्यम्। द्वितीयेऽध्याये वारत्रयं शान्तिशब्दः आगच्छति। ज्ञानस्याविर्भावान्ते शान्तिः तत्तु निश्चितमेवास्ति। इदानीं तान् त्रीन् शब्दान् सश्लोकं पश्यामः। यथा- भगवद्गीता द्वितीयोऽध्यायः षट्षष्ठितमो श्लोकः। श्लोको यथा-

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्॥ [2]

अशान्तः मानवः न कदापि सुखस्यानुभूतिं कर्तुं शक्नुयात्। मानवः यावद्भगवद्परायणो भगवदभिमुखो च न भवति। भगवतः सम्पर्के सम्बन्धे वा न भवति तस्य मतिः बुद्धिः दिव्या न भवति। चित्तमपि संयमितं न भवति। चित्तस्य विना संयमेन शान्तिः कदापि न स्यात्, सः अशान्तः भवति। अशान्तस्य च सुखं नास्तीति भावः।

भावनारहितः प्रेमसहितः संवेदना रहितो वा न कदापि शान्तिं प्राप्स्यति। चेतसि अशान्तिः केन कैः कारणेन कारणैर्वा वर्तते

[2] श्रीमद्भगवद्गीता-२-६६।

Scanned with CamScanner

तद् ज्ञास्यामः चेत् स्वतः ज्ञानं भविष्यति। यदिदमकारणेन शान्तिः भविष्यतीति।

द्वितीयेऽध्याये द्वितीयः शान्तिः शब्दः प्रयुक्तो वर्तते तद् यथा-

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामाकामी॥ [3]

यथा समुद्रे नदीनां प्रवाहः नैरन्तर्येण मिलति तथापि निरन्तरजलागमनेनापि समुद्रः स्थिरो भवति तथैव वासनारहित-प्रवाहेणापि मनुजः स्थिरो भवति चेत् सः मनुजः शान्तिं प्राप्स्यति। किन्तु इच्छाप्रवाहं शान्तं कर्तुं यतमानः मनुजः न कदापि शान्तिं विन्दति इच्छाः न कदापि शान्ताः भविष्यन्ति। अतः ताः शान्तं चिकीर्षुः स्वयमशान्तः भविष्यति। कामकामी शान्तिं नाप्नोति। तृतीयवारं शान्तिः शब्दः यथा-

विहाय कामान्यः सर्वान् पुमांश्चरति निःस्पृहः।
निर्ममो निरहङ्कार स शान्तिमधिगच्छति॥ [4]

येन मानवेन इन्द्रियतृप्तिपूर्त्यै सर्वासामिच्छानां त्यागः कृतो विद्यते यः निःस्पृहो वसति। येन स्वामित्वभावस्य च नाशः कृतः तथा मिथ्याहङ्कारात् रहितोऽस्ति स एव वास्तविकं शान्तिसुखं प्राप्तुं शक्नुयात्। तृतीयेऽध्याये शान्तिशब्दः नास्ति। चतुर्थेऽध्याये एकवारं शान्तिशब्दः प्रयुक्तः वर्तते। तद्यथा-

श्रद्धावाल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥ [5]

---

[3] श्रीमद्भगवद्गीता- २- ७०।
[4] श्रीमद्भगवद्गीता- २- ७१।
[5] श्रीमद्भगवद्गीता- ४- ३९।

Scanned with CamScanner

यः जनः दिव्यज्ञानाय समर्पितोऽस्ति। श्रद्धायुतोऽस्ति यः स्वस्येन्द्रियाणि संयमितुं जानाति। श्रद्धायुतः सः नरः ज्ञानाधिकारी वर्तते तादृशश्च ज्ञानं लब्ध्वा शान्तिः प्राप्ता भवति। अतः पुनरेकवारं श्रद्धायुतेन चेतसा परं ज्ञानं लभ्यते चेत् शान्तिः अयमपि उपायः। 'ज्ञानेन लोकं वशमानयन्ति'। पञ्चमाध्यायानुसारेण शान्तिः यथा- तर्हि पञ्चमेऽध्याये वारद्वयं शान्तिशब्दः भगवता प्रयुक्तोऽस्ति। यथा-

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबद्ध्यते॥ [6]

भक्तौ स्थिरः मनुष्यः शान्तिं प्राप्नोति। कारणं भक्तः कर्मफलत्यागी भवति कर्मफलं विभवे प्रयच्छति। समर्पितश्च भक्तः शान्तिं प्राप्नोति। यः जनः भगवता युतो न भवति तथा स्वश्रमस्योपार्जितस्य फलस्य लोभी भवति स बद्धो भवति तथा च बद्धः न कदापि शान्तो शान्तियुक्तो वा भवति। पञ्चमाध्याये द्वितीयवारं शान्तिशब्दो यथा-

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥ [7]

ईश्वर एव सर्व यज्ञतपसां भोक्तास्ति। समस्तग्रहाणां देवानां च स एव ईश्वरोऽस्ति। ईश्वरः समेषां हितकर्ता एव अस्ति। ईश्वरेच्छायां स्वस्येच्छां समर्पयति तादृशः मनुष्यः संसारदुःखेभ्यः शान्तिं प्राप्नोति। सः शान्तिं ऋच्छति नाम प्राप्नोति। अतोऽयमपि एकोपायः। भगवन्तं ज्ञात्वा शान्तिः। षष्ठेऽध्याये चतुर्वारं शान्तिः इति शब्दः आगच्छति। तत्रादौ चतुर्दशे श्लोके यथा-

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चितो युक्त आसीत मत्परः ॥ [8]

[6] श्रीमद्भगवद्गीता- ५- १२।

[7] श्रीमद्भगवद्गीता- ५- २९।

Scanned with CamScanner

अविचलेन मनसा स्थित्वा, भयरहितश्च भूत्वा मनः संयम्य भगवति दत्तचित्तः भवति चेत् स शान्तियुक्तो भवति। प्रशान्तात्मा भवति।

युञ्जन्नेवं सदात्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति॥ [9]

शरीरस्य कर्मणश्च मनसः संयमाभ्यासं कुर्वन् मनः संयमितो यः भवति भौतिकासक्तिं समापयति स शान्तियुतो भवति। सारतयावलोक्यते भौतिकभावं जगद्भावं नाशयति संयमयति वा स शान्तिं प्राप्नोति। आत्मा परमात्मनि वर्तते चेदपि शान्तिः।

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।
उपैति शान्तरजसं ब्रह्मभूतमकल्पषम्॥ [10]

भगवति यस्य मनः स्थिरम्। स दिव्यसुखस्य सर्वोच्च्यां स्थितिमनुभवति । सर्वोत्तमां सिद्धिं च प्राप्नोति। यः रजोगुणात् परः विमुखो वा भवति परमात्मनि गुणात्मैकतायाः साक्षात्कारं करोति भूतकालस्य स्वसर्वकर्मणां फलेन मुक्तः भवति स शान्तिं प्राप्नोति। स शान्तिमनुभवति।

मनः शान्तं भवतु। रजोगुणः शान्तः भवतु। जीवः निष्पापः भवतु ततः शान्तिः। सप्तमेऽध्याये अष्टमेऽध्याये शान्तिशब्दः नास्ति। ततः नवमेऽध्याये शान्तिः यथा-

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति॥ [11]

---

[8] श्रीमद्भगवद्गीता - ६- १४।
[9] श्रीमद्भगवद्गीता - ९- १५।
[10] श्रीमद्भगवद्गीता - ६- २७।

Scanned with CamScanner

यः क्षिप्रं धर्मात्मा भवति सः स्थायीं शान्तिं चिरन्तनां शान्तिं च प्राप्नोति। धर्माचरणमपि एकः उपायः शान्तिप्राप्त्यै इति अत्र कथनस्याशयः वर्तते। ततः दशमे एकादशे अध्याये शान्तिशब्दः नास्ति। द्वादशेऽध्याये शान्तिः यथा-

श्रेयो हि ज्ञानभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्॥ [12]

अभ्यासात् ज्ञानं, ज्ञानात् ध्यानं, ध्यानात् कर्मफलत्यागः, कर्मफलत्यागाच्च शान्तिः सा शान्तिः श्रेयस्करी। कथनस्याशयः त्यागात् शान्तिः। तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् [13] इति ईशावास्यौपनिषदि प्रोक्तम्। ततः षोडशेऽध्याये देवासुरसम्पद्विभागयोगे द्वितीयश्लोके शान्तिः शब्दः दरिदृश्यते । त्यागः शान्तिरपैशुनमिति। [14] दैवीगुणेषु एकः महान् गुणः वर्तते यत् शान्तिरिति। अतः यः शान्त स एकेन दैवीगुणेन युक्तोऽस्ति तदपि अवगन्तव्यमिति। शान्तिः एका दैवीसम्पत्तिः वर्तते। ततः सप्तदशेऽध्याये शान्तिः नास्ति। अष्टादशेऽध्याये वारद्वयं शान्तिशब्दः आगच्छति। तद्यथा-

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते॥ [15]

अहङ्काररहितः शान्तः भवति। किन्तु अत्र भगवता पूर्वापरसन्दर्भेणोच्यते यत् बुद्धया शुद्धो भूत्वा धैर्यपूर्वकं मनः संयम्य,

---

[11] श्रीमद्भगवद्गीता - ९- ३१।
[12] श्रीमद्भगवद्गीता - १२- १२।
[13] ईशोपनिषद्- १।
[14] श्रीमद्भगवद्गीता - १६- २।
[15] श्रीमद्भगवद्गीता - १८- ५३।

Scanned with CamScanner

इन्द्रियविषयाणां त्यागं कृत्वा, रागद्वेषाभ्यां मुक्तो भूत्वा यः एकान्तं स्थानं सेवते अल्पभोगी च वर्तते यः स्वं शरीरं मनः वाणीं च वशमानयति वशीकर्तुं वा जानाति समाधौ वसति विरक्तो भूत्वा तिष्ठति मिथ्याहङ्कारात् मिथ्यासक्त्याः मिथ्या गर्वात् कामात्-क्रोधात्-भौतिकवस्तुसंग्रहात् मिथ्या स्वामिभावात् प्रतिवसति स शान्तः भवति। आत्मसाक्षात्कारपदं च प्राप्नोति। नास्ति तत्र काचिदपि शङ्का।

तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्॥ [16]

समग्रभावेन सम्पूर्णभावेन तमेव शरणं गच्छ तस्य (भगवतः, ईश्वरस्य, विभोः, परमात्मनः) कृपया परमां अत्युत्तमां उच्चतमां परमोच्चां शान्तिं त्वं प्राप्स्यसि सर्वोपरी सनातनं धाम च प्राप्स्यसि। अतः कथनस्याशयरूपेण अष्टादशतमाध्यायस्य अनेन श्लोकाधारेण भगवान् कथयति कश्चित् प्रति पूर्णमात्मसमर्पणं स्यात् चेदपि शान्तिं प्राप्स्यसि। अतः आत्मनिवेदनभ-क्तिरपि आत्मसमर्पणमपि शरणागतभावोऽपि प्रसन्नता अपि एका परमा शान्तिः विद्यते।

अस्माभिः यजुर्वेदस्य पाठावसरे भद्रसूक्तस्य पाठावसरे एकः मन्त्रः उच्यते। "द्यौः शान्तिरन्तरिक्ष शान्तिः....." [17]। तत्र तत्र स्थानेषु शान्त्यै प्रार्थना क्रियते तत्तत्स्थाने शान्तिर्भवतु तदर्थं वेदघोषः क्रियते किन्तु यावदन्तः शान्तिः नास्ति तावद् न कुत्रापि शान्त्याः प्रतीतिः भविष्यति। एकवारं तस्याः शान्त्याः प्राप्तिर्भवति ततस्तु प्रतिवारं तस्याः अनुभूतिरेव कर्तव्या भवति।

[16] श्रीमद्भगवद्गीता - १८- ६२।
[17] यजुर्वेदः।

Scanned with CamScanner

मन्त्रान्ते अस्माभिः वारत्रयं शान्तिः शान्तिः शान्तिः इति उच्चारणं क्रियते तदपि त्रया-णां लोकानां शान्तिः तथा च त्रिविधदुःखेभ्यः शान्तिर्भवतु तादृशः तत्र भावः विद्यते । अन्ते पद्मपुराणस्य शान्तिलक्षणं दृष्ट्वा समाप्यते तद्यथा-

यत्किञ्चिद्वस्तु संप्राप्यस्वल्पं वा यदि वा बहुः।
या वृत्तिर्जायते चित्तेसा शान्तिः कथ्यते बुधैः॥ [18]

यथा शस्त्रप्रहाराणांकवचं विनिवारकम्।
तथा दैवोपघातानांशान्तिर्भवतिवारणम्॥ [19]

## सन्दर्भग्रन्थसूची


१. महाभारतम्, गीताप्रेस् गोरखपूर्, संवत् – २०६१

२. श्रीमद्भगवद्गीतामूलमात्रम्, गीताप्रेस् गोरखपूर्, संवत् – २०६१

३. श्रीमद्भगवद्गीता श्रील प्रभुपादप्रकाशिता, भक्तिवेदान्तप्रभुपाद , नर्मदा गोस्वामी, जुहू, मुम्बई

४. शुक्लयजुर्वेदः

५. पद्मपुराणम्

६. शान्तिमयूखः

७. ईशावास्योपनिषद्


[18] पद्मपुराणम् क्रियायोक्ते-/५ सन्तोषभेदे-/६।

[19] हेमाद्रिशान्तिकाण्डे शान्तिमयूखे।

Scanned with CamScanner